# श्रीमद् भागवत रसिक कुटुंब

## श्री नन्द नन्दनाष्टकम्

सुचारुवक्त्रमण्डलं सुकर्णरत्नकुण्डलम् ।

सुचर्चिताङ्गचन्दनं नमामि नन्दनन्दनम् ॥ 1॥

सुदीर्घनेत्रपङ्कजं शिखीशिखण्डमूर्धजम् ।

अनन्तकोटिमोहनं नमामि नन्दनन्दनम् ॥ 2॥

सुनासिकाग्रमौक्तिकं स्वच्छदन्तपङ्क्तिकम् ।

नवाम्बुदाङ्गचिक्कणं नमामि नन्दनन्दनम् ॥ 3॥

करेणवेणुरञ्जितं गतिः करीन्द्रगञ्जितम् ।

दुकूलपीतशोभनं नमामि नन्दनन्दनम् ॥ 4॥

त्रिभङ्गदेहसुन्दरं नखद्युतिः सुधाकरम् ।

अमूल्यरत्नभूषणं नमामि नन्दनन्दनम् ॥ 5॥

सुगन्ध अङ्गसौरभं उरो विराजि कौस्तुभम् ।
स्फुरत् श्रीवत्सलाञ्छनं नमामि नन्दनन्दनम् ॥ 6॥

वृन्दावनसुनागरं विलासानुगवाससम् ।
सुरेन्द्रगर्वमोचनं नमामि नन्दनन्दनम् ॥ 7॥

व्रजाङ्गनासुनायकं सदा सुखप्रदायकम् ।
जगन्मनःप्रलोभनं नमामि नन्दनन्दनम् ॥ 8॥

श्रीनन्दनन्दनाष्टकं पठेद्यः श्रद्धयान्वितः ।
तरेद्भवाब्धिदुस्तरं लभेत्तदङ्घ्रियुक्तकम् ॥

इति श्रीनन्दनन्दनाष्टकं सम्पूर्णम् ।